पक्ष्मकोपस्तथैव च । एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः । नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रचक्ष्महे । पिडकाभ्यन्तरमुखी बाह्याधोवर्त्मसंश्रया । विज्ञेयोत्सङ्गिनी१ नाम तद्रूपपिडकान्विता । कुम्भीकवीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः । आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकाः२स्तु ताः । कण्डूस्रावान्विता गुर्व्यो रक्तसर्षपसन्निभाः । पिडकाश्च रुजावत्यः पोथक्य३ इति संज्ञिताः । पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता । पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा४ । सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शोवर्त्म५ कीर्त्त्यते । दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसम्भवः । व्याधिरेष समाख्यातः शुष्कार्श६ इति संज्ञितः । दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा । मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका७ । वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः । सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म८ तत् । कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः । न समं छादयेदक्षि भवेद्बन्धः९ स वर्त्मनः । मृद्वल्पवेदनं ताम्रं तद्वर्त्म सममेव च । अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म१० तदादिशेत् । क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा । तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः११ । यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् । दाहकण्डूपरिक्लेदि श्याववर्त्मेति१२ तन्मतम् । अरुजं बाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि । कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म१३ तदुच्यते । यस्य धौतानि धौतानि सम्बध्यन्ते पुनः पुनः । वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म१४ तत् । विमुक्तसन्धि निश्चेष्टं वर्त्म यस्य निमील्यते । एतद्वातहतं१५ विद्यात् सरुजं यदि वाऽरुजम् । वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् । विज्ञेयमर्बुदं१६ पुंसां सरक्तमवलम्बितम् । निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः । चालयेदतिवर्त्मानि निमेषः१७ स गदो मतः । छिन्नाश्छिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः । दाहकण्डूरुजोपेतास्तेऽर्शःशोणितसम्भवाः१८ । अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः । सकण्डूः पिच्छिलः कोलप्रमाणो लगण१९स्तु सः । शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् । बिसमन्तर्जल इव बिसवर्त्मेति२० तन्मतम् । पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च । निर्वर्त्तयन्ति पक्ष्माणि तैर्जुष्टञ्चाक्षि दूयते । उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते । वातातपानलद्वेषी पक्ष्मकोपः २१ स उच्यते ।” तच्चिकित्सा तत्र दृश्या ।

**वर्त्मनि** स्त्री वृत-अनि सुट् च । पथि उणा० ।

**वर्द्ध** छेदने पूरणे च चु० उभ० सक० सेट् । वर्द्धयति ते अववर्द्धत् त । [भावे अच् । २पूरणे ३छेदे च ।

**वर्द्ध** पु० वृध-अच् । १ब्राह्म्याम् (वामनहाटि) जटा० वर्द्ध-

**वर्द्धक** पु० वृध-ण्वुल् । १ब्राह्मणयष्टौ (वामनहाटी) अमरः वृध-वा वर्द्ध-ण्वुल् । २पूरके ३छेदके ४वृद्धिकारके च त्रि० ।

**वर्द्धकि** पु० वर्द्ध-छेदने अच् कम-डि कर्म० । त्वष्टरि (छुतार) अमरः । [जातिभेदे शब्दर० ।

**वर्द्धकिन्** पु० वर्द्धकः वर्द्धोऽस्त्यस्य इनि । त्वष्टरि (छुतार)

**वर्द्धन** न० वृध-वर्द्ध-भावे ल्युट् । १छेदने २पूरणे च मेदि० । वृध णिच्-ल्यु । ३वृद्धिकारके त्रि० । “करोमि ज्ञातिवर्द्धनम्” भट्टिः । वृध-ल्यु । ४वृद्धियुक्ते त्रि० ।

**वर्द्धनी** स्त्री वर्द्ध्यतेऽनया वृध-णिच्-ल्युट् ङीप् । १संमार्जन्याम् २खट्वां मेदि० ३जलपात्रभेदे च (वदुना) जटा० ।

**वर्द्धमान** पु० वृध-शानच् । १एरण्डवृक्षे अमरः । २वृद्धिशीले त्रि० । ३शरावे मृत्पात्रभेदे ४विष्णौ ५पशुभेदे च मेदि० । ६जिनभेदे हेमच० । ७धनिनां गृहभेदे हला० । ८देशभेदे वृ० स० १४अ० कूर्म्मविभागशब्दे दृश्यम् । ९नगरभेदे च । १०वृद्धियुक्ते त्रि० ।

**वर्द्धापन** न० वर्द्धं छेदं करोति वर्द्ध+णिच्-आप् च ततो भावे ल्युट् । नाडीच्छेदनकर्माङ्गे संस्कारभेदे त्रि०त० रघुः ।

**वर्द्धित** न० वर्द्ध-क्त । १छेदिते २पूरिते ३प्रसृते च ।

**वर्द्धिष्णु** त्रि० वृध-इष्णुच् । वृद्धिशीले । [भरतः ङीप् ।

**वर्ध्र** न० वृध-ष्ट्रन् । १चर्म्मणि उणादिको० । २चर्म्मरज्ज्वौ स्त्री

**वर्पस्** न० वृ-असुन् पुक् । रूपे निघण्टुः ।

**वर्फ** गतौ बधे च भ्वा० पर० सक० सेट् । वर्फति अवर्फीत् ।

**वर्म्मकण्टक** पु० वर्म्म इव कण्टकोऽस्य । पर्पटे राजनि० ।

**वर्म्मकषा** स्त्री वर्म्म-कषति अच् । (चामकषा) सप्तलायाम् शब्दर० ।

**वर्म्मन्** न० वृ-मनिन् । १कवचे सन्नाहे अमरः । २जातियोपाधौ पु० । “वर्म्मान्तं जातियस्य तु” शातातपः ।

**वर्म्महर** पु० वर्म्म हरति हृ-अच् । सन्नाहधारणयोग्यावस्थाभेदे तरुणे । “वर्म्महरः कुमारः” रघुः ।

**वर्म्मि** पु० वृ-बा० मिन् । (बान) मत्स्यभेदे राजनि० ।

**वर्म्मित** त्रि० वर्म्म करोति णिच्-क्त । १कृतसन्नाहे २उद्युक्ते च

**वर्य्य** त्रि० वृ-यत् । १प्रधाने श्रेष्ठे च अमरः । २कामदेवे